नं० ६५२-घ

कामन्दकीयनीतिसारः (नीतिशास्त्रम्) (अपूर्णम्)

नं० ६५२-घ

पत्राणि ३६

~~नं० ६५२-घ~~

नं० ६५२-घ (अपूर्णम्)

कामन्दकीयनीतिसारः (नीतिशास्त्रम्)

कामंदक

कामं श्रीगणेशाय नमः ॥ यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति ॥ देवः स जयति श्रीमान् दण्डधारो महीपतिः ॥१॥ वंशे विशाले वंश्यानामृषीणा
१ मिव भूयसां अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥२॥ जातवेदा इवार्चिष्मान्वेदान्वेदविदांवरः योधीतवान्सुचतुरश्चतुरोप्येकवेद
वत् ३ यस्याभिचारवज्रेण वज्रज्वलनतेजसः पपात मूलतः श्रीमान्सुपर्वा नन्दपर्वतः ४ एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीं ॥५॥ नीतिशास्त्रामृतं धीमानर्थशास्त्रमहोदधेः समुद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ६
दर्शनात्तस्य सुदृशो विद्यानां पारदृश्वनः राजविद्याप्रियतया संक्षिप्तग्रन्थमर्थवित् ७ ॥ उपार्जने पालने च भूमेर्भूमीश्वरं प्रति य
त्किंचिदुपदेक्ष्यामि राजविद्याविदां मतं ८ राजास्य जगतो हेतुर्वृद्धेर्वृद्धातिसम्मतः नयनानन्दजननः शशाङ्क इव तोयधेः ९ यस्मि
स्यान्नरपतिः सम्यङ्नेता ततः प्रजाः अकर्णधारा जलधौ विप्लवेतेह नौरिव १० धार्मिकं पालनपरं सम्यक्परपुरंजयं राजानमभिमन्यन्ते प्रजाप
तिमिव प्रजाः ११ प्रजां संरक्षति नृपः सा वर्द्धयति पार्थिवं वर्द्धनाद्रक्षणं श्रेयस्तदभावे सदप्यसन् १२ न्यायप्रवृत्तो नृपतिरात्मानमथवा प्र राम
जा त्रिवर्गेणोपसंधत्ते निहन्ति ध्रुवमन्यथा १३ धर्माद्वैवस्वतो राजा विधायभुजे भुवं अधर्माच्चैव नहुषः प्रतिपेदे रसातलं १४ तस्माद्धर्मं १
पुरस्कृत्य यतेतार्थाय पार्थिवः धर्मेण वर्द्धते राज्यं तस्य स्वादु फलं श्रियः १५ स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोषो बलं सुहृत् एतावदुच्य

तेरम्भंसत्वबुद्धिव्यपाश्रयं १६ आलंव्यकल्पवत्समनं वुध्यालोकिननिर्गमः सम्भागस्यास्य भापयतेनसततोत्थितः १७ न्यायेनार्ज्जनमर्थ
स्यरक्षणंवर्द्धनंतथा सम्यक्प्रतिपतिश्चराजवृत्तंचतुर्विधं १८ नयविक्रमसंपन्नःसुस्थानश्रियंतयेच्छ्रियं नयस्यविनयोमूलंविनयः
शास्त्रनिश्चयः १९ विनयोहीन्द्रियजयस्तद्युक्तःशास्त्रमृछति तन्निष्ठस्यहिशास्त्रार्थाःप्रसीदंतिततःश्रियः २० शास्त्रंप्रज्ञाधृ
तिर्दाक्ष्यंप्रागल्भ्यंधारणिष्णुता उत्साहोवाग्मितादीर्घमापत्क्लेशसहिष्णुता २१ प्रभावःशुचितामैत्रीत्यागःसत्यंकृतज्ञता कुल
शीलंदमश्चेतिगुणाःसम्पत्तिहेतवः २२ आत्मानंप्रथमंराजाविनयेनोपपादयेत्ततोमात्यांस्ततोभृत्यांस्ततःपुत्रांस्ततःप्रजाः २३ स
दानुरक्तप्रकृतिःप्रजापालनतत्परः विनीतात्माहिनृपतिर्भूयसींश्रियमाश्नुते २४ प्रकीर्णविषयारण्येधावन्तंविप्रमाथिनं
ज्ञानांकुशेनकुर्वीतवशमिंद्रियदन्तिनं २५ आत्माप्रयत्नेनार्थेभ्योमनःसमधितिष्ठति संयोगादात्ममनसोप्रवृत्तिरुपजाय
ते २६ विषयाविषयक्षोभेनमनःप्रेरयतीन्द्रियं निरुध्यात्मप्रयत्नेनजितेतस्मिन्जितेन्द्रियः २७ विज्ञानंहृदयंचित्तंमनोबुद्धिश्चतत्स
मं अनेनात्माकरोतीहप्रवर्त्तननिवर्तनं २८ धर्माधर्मौसुखंदुःखंमिछाद्वेषौप्रयत्नवच प्रयत्नज्ञानसंस्काराआत्मलिंगमुदाहृतं २९
ज्ञानस्यायुगपद्भावोमनसोलिंगमुच्यतेनानार्थेषुचसंकल्पःकर्मचास्यप्रकीर्तितं ३० श्रोत्रंत्वक्चक्षुषीजिह्वानासिकाचेतिपंचमीपायुपस्थं

कामं० हस्तपादौ वाक्केनी द्विपसंग्रहः ३१ शब्दः स्पर्शश्च रूपञ्च रसो गंधश्च पंचमः उत्सर्गानंदनादानगत्यालापाश्च तत्क्रियाः ३२ आमामनश्च तद्धि
२ जैरंतकरणउच्यते आभ्यां तु सप्रपत्नाभ्यां संकल्पस्तु उपजायते ३३ आत्मबुद्धींद्रियाणपर्याविद्भिः करणमुच्यते संकल्पाध्यवसायाभ्यां
सिद्धिरस्य प्रकीर्त्तिता ३४ उभे एते हि करणे प्रत्यानन्तर्यके स्मृते तस्मात्प्रयत्नसंरोधाद्धारयेत्त्रिमतिक्षती ३५ एवं कारण
साम्यप्राप्तिं संप्रपाल्यात्मानमात्मना नयापनपविद्राजाकुर्वीत हितमात्मनः ३६ एकस्यैव हि पोषणात्तो मनसः संन्निवर्हणे महीं
सागरपर्य्यंतां सकपंत्यवजेष्यति ३७ निपावसानविरसैर्विषयैरपट्टाशिभिः गच्छत्यापिसतत्त्वहपकारीवतत्रपतिर्महं ३८ मज्ज
मानो यकार्येषु विषमां धीहतेभ्रणः आवहत्यु तमपदां स्वपमेवापहं तपः ३९ शब्दः स्पर्शश्च रूपञ्च रसो गंधश्च पंचमः एकैक
मत्वमेतेषा विनाशप्रतिपत्तये ४० श्रुत्विशाव्यां कुराहारो विदूरभ्रमणाक्षमः लुब्धकाह्वीतत्लोभेनमृगो मृगपतेर्वधं ४१ गि
रीद्रशिखराकारो विलपान्मलिनद्रुमः करिणो स्पर्शसंमोहाद्दालानेपतिवारणः ४२ स्निग्धदीपशिखालोके विलोभितविलो राम
चनः मत्तमग्धत्सपंमोहात्संतेगः सहसापतत् ४३ दूरेपि हिभवन्स्वेरयाप्रसलिलेचरन्मीनस्तु सामिषं लोहमास्वाद्यपतिमृत्सवे २
४४ गंधलुब्धोमधुकरो दासवपिपासया अघेत्यसुस्त्वसंवारागजकर्णज्वलज्वलां ४५ एकैकसोविनिघ्नंति विषपाविषसन्निभाः

क्षपीतसकपंनस्याद्यःसमंपंचसेवते ४६ सेवेतत्वसंप्राप्तान्कामान्नात्यासक्तोवशी सुखंहिफलमर्थस्यतन्निरोधेवृथाश्रियः ४७ निका
मसक्तमनसांकान्तामुखविलोकने गलंतिगलिताश्रूणांयौवनेनसहश्रियः ४८ धर्मादर्थोऽर्थतःकामःकामात्सुखफलोदयःआ
त्मानंहंतितेनोहत्वायुक्त्यायाननिषेवते ४९ नामापिस्त्रीतिसंह्लादिविकरोत्येवमानसं किंपुनर्दर्शनंतस्याविलासोल्लासित
भ्रुवः ५० रहःप्रचारकुशलामृदुगद्गदभाषिणी कंननारीरमयतिरक्तांतलोचना ५१ मुनेरपिमनोवश्यंसरागंकुरुतेऽङ्गना प्र
सन्नेकांतिजननसंध्येवप्राणिमंडले ५२ मनःप्रह्लादयंतीभिर्मदयंतीभिरप्यलं महान्तोपिहिभिद्यन्तेस्त्रीभिरद्रिरिवाचलाः
५३ मृगयाक्षास्तथापानंगर्हितानिमहीभुजां दृष्टास्तेभ्यस्तुविपदःपांडुनैषधवृष्णिषु ५४ कामःक्रोधस्तथालोभोमदोहर्षोमानो
मदस्तथा षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्तेसुखीनृपः ५५ दंडक्योनृपतिःकामात्क्रोधाच्चजनमेजयः लोभादैलुराजर्षिर्वातापि
र्हर्षतोऽसुरः ५६ पौलस्त्योराक्षसोमानान्मदाद्दंभोद्भवोनृपः प्रयातानिधनंत्वेतेशत्रुषड्वर्गमाश्रिताः ५७ शत्रुषड्वर्गमुत्सृज्य
जामदग्न्योजितेन्द्रियः अंबरीषोमहाभागोबुभुजातेचिरंमहीं ५८ वर्द्धयन्निहधर्मार्थौसेवितौसद्भिरादरात् निगृहीतेन्द्रियःप्रा
ज्ञःकुर्वीतगुरुसेवनं ५९ शास्त्रायगुरुसंयोगःशास्त्रंविनयवृद्धये विद्याविनीतोनृपतिर्नकृच्छ्रेष्ववसीदति ६० वृद्धोपसे

का॰ म वीरःपतिःसतांभवतिसंमनः प्रेर्यमाणोप्यसद्वृत्तैर्नाकार्येषुप्रवर्त्तते ६१ आहर्त्तानःप्रतिदिनंकलाःसम्यग्ग्रहीपतिःशुक्लपक्षेइवविचर
३ न्शशांकइववर्द्धते ६२ जितेन्द्रियस्यनृपतेर्नीतिशास्त्रानुसारिणः भवंतिज्वलितालक्ष्म्याः कीर्त्तयश्चनभःस्पृशः ६३ इतिस्मर
ज्ञाविनयीनपार्थिवोनिषेवमाणोनरदेवसेवितं पदंसमाक्रामतिभास्वरंश्रियःशिरोमहारत्नगिरेरिवोन्नतं ६४ इयंहिलोक
व्यतिरेकवर्त्तिनीस्वभावतःपार्थिवतासमुद्धता बलान्तरेनांविनयेतियोजयेत्प्रयस्यसिद्धौविनयःपुरःसरः ६५ परंविनीतःसम
यैनिसेव्यतांमहीपतीनांविनयोविभूषणं प्रवृत्तदानोमदुसंचरत्करःकरीवभद्रोविनयेनशोभते ६६ गुरूक्तविद्याधि
गमायसेव्यतेअनाचविद्यामनयेमहात्मनां अनानिवर्त्तीतिमनाग्निबेधसामसंशयंसाधुभवंतिमन्यये ६७ सुनि
पुणामुपसेव्यसद्गुरुंचिरमनुवृत्तिपरोविभूतये भवतिहिविनयोपबृंहितोनृपतिपुरापशमायच्चक्षमः ६८ अविनयात
मादरेणतेवशमवशांच्चनपत्निविद्विषः अनविनयविधिःसमाश्रितंजक्तनरपिनैतिपराभवंक्वचित् ६९ इतिकामंदकी
येनीतिसारेइन्द्रियविजयोविद्यावृद्धसंयोगोनामप्रथमःसर्गः १ आन्वीक्षिकीत्रयीवार्त्तादंडनीतिश्चपार्थिवः तद्विद्यैस्तत्क्रियो एम
पेतैश्चिन्तयेद्विनयान्वितः १ आन्वीक्षिकीत्रयीवार्त्तादंडनीतिश्चशाश्वती विद्याश्चतस्रएवैतायोगक्षेमायदेहिनां २ त्रयाविद्या २

दंडनीतिरिति विद्या ह्यिमा मानवाः त्रय्या एव विभागोयं येयमान्वीक्षिकी मता ३ वार्त्ता च दंडनीतिश्च द्वे विद्ये इत्यवस्थितः लोकस्यार्थप्र
धानत्वाद्धिष्यासुरपुरोधसः ४ एकैव दंडनीतिस्तु विद्येत्यौशनसाः स्थिताः तस्यां हि सर्वविद्यानामारंभाः समुदाहृताः ५ विद्याश्चतस्र
एवैता इति नो गुरुदर्शनं पृथक्पृथक् च सिध्यर्थमासां लोकोस्यवस्थितः ६ आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ अर्थानर्थौ
तु वार्त्तायां दंडनीत्यां नयानयौ ७ आन्वीक्षिकी त्रयी वार्त्ता सती विद्याश्च चक्षते सत्योपि हि न सत्यस्ता दंडनीतेस्तु विभ्रमः ८ दंडनीतिर्य
दा संपन्ना जात्मधितिष्ठति तदा विद्याविदः शेषा विद्याः सम्यगुपासते ९ वर्णाः सर्वाश्रमाश्चैव विद्यास्वासु प्रतिष्ठिताः ईक्षणा
दीक्षणात्तासां तद्धर्मसंशयाभावतः १० आन्वीक्षिक्यात्मविद्या स्यादीक्षणात्सुखदुःखयोः ईक्षमाणस्तयामलं हर्षशोकौ व्यु
दस्यति ११ ऋग्यजुःसामनामानस्त्रयो वेदास्त्रयी मता उभौ लोकानवाप्नोति त्रय्यां तिष्ठन्यथाविधिः १२ अंगानि वेदाश्चत्वा
रो मीमांसा न्यायविस्तरः धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते १३ पाशुपाल्यं कृषिः पुण्यं वार्त्ता वार्त्तानुजीविनां संपन्नो वा
र्त्तया साधुर्न वृत्तेर्भयमृच्छति १४ दमो दंड इति ख्यातस्तात्स्थ्याद्दंडो महीपतिः तस्य नीतिर्दंडनीतिर्नयनान्नीतिरुच्यते १५ तया
मानश्च येषा च विद्या पायान्महीपतिः विद्यालोकोपकारिण्यस्तस्मात्ताहि महीपतिः १६ विद्यानुदाभिनि पुण्यं श्रुत्वा सुंदर धीः

६ विधानतस्तास्ता विद्यास्त्वं विद्धि ज्ञानेन निरूप्यते २७ इज्याध्ययनदानानि यथाशास्त्रं सनातनः ब्राह्मणक्षत्रियविशां सामान्यो धर्म उच्य
ते २८ याजनाध्यापने शुद्धे विशुद्धाच्च प्रतिग्रहः वृत्तित्रयमिदं प्राहुर्मुनयो ज्येष्ठवर्णिनः २९ शस्त्राजीवनं राज्ञो भूतानां चाभि
रक्षणं पाशुपाल्यं कृषिः पण्यं वैश्यस्याजीवनं स्मृतं २० शूद्रस्य धर्मः शुश्रूषा द्विजानामनुपूर्वशः शुद्धा च वृत्तिस्तस्यैव कारुका
रणाकर्म च २१ गुरौ वासोऽग्निशुश्रूषा स्वाध्यायो व्रतधारणं त्रिकालस्नायिता भैक्ष्यं गुरौ प्राणान्तिकी स्थितिः २२ तदभावे गुरुसु
ते न यावद्ब्रह्मचारिणि कामतो वाश्रमान्तरं स धर्मो ब्रह्मचारिणः २३ समेखलाजटी दंडी मुंडो वा गुरुसंश्रयः आविद्या
ग्रहणात्कुर्छेत्कामतो वाश्रमांतरं २४ अग्निहोत्रोपचरणाजीवनं च स्वकर्मभिः धर्मतोऽर्थेषु कार्येषु पर्ववर्ज्यरतिक्रिया २५ प्र
तिग्रहनिवृत्तिश्च त्रिः स्नानं ब्रह्मचारिता देवातिथीनां पूजा च धर्मोऽयं वनवासिनः २६ सर्वारंभपरित्यागो भैक्ष्यं वृक्षमू
लिता निष्परिग्रहताद्रोहो समता सर्वजन्तुषु २७ प्रियाप्रियपरिष्वंगः सुखदुःखानुकारिता सबाह्याभ्यंतरं शौचं वागप
मे ब्रह्मचारिता २८ सर्वेन्द्रियसमाहारो धारणाध्याननित्यता भावसंशुद्धिरित्येष परिव्राड्धर्म उच्यते २९ अहिंसा सूनृता
वाणी सत्यं शौचं दया क्षमा वर्णिनां लिंगिनां चैव सामान्यो धर्म उच्यते ३० स्वधर्मेण त्वाय धर्मोऽयं सर्वेषां वर्णिलिंगिनां नस्याभ्या ९

वेमुक्तो लोयं संकरान्नाशमाप्नुयात् ३१ सर्वस्यास्य यथान्यायं भूपतिः संप्रवर्त्तकः तस्याभावे धर्म्मनाशस्तदभावे जगच्युतिः ३२ व
र्णाश्रमाचारयुक्तो वर्णाश्रमविभागवित् पाता वर्णाश्रमाणां च पार्थिवः स्वर्गलोकभाक् ३३ इति पस्मादुभौ लोकौ
पायितात्मनो नृपः प्रजानां च नते सम्यग् दंडं दंडी व धारयेत् ३४ उद्वेजयति तीक्ष्णेन मृदुना परिभूयते दंडेन नृपतिस्तस्मायु
क्तदंडः प्रशस्यते ३५ त्रिवर्गो वर्द्धयत्याशु राज्ञो दंडो यथाविधि प्रणीतो वासमंजस्याद्धन्त्यान्यपि कोपयेत् ३६ लोकशास्त्रा
नुगो नेयो दंडो नोत्तेजनः श्रिये उद्वेजनाद्धर्म्मस्तु तस्मान्मुञ्चो महीपतेः ३७ परंपराभिषतनाज्जगतोभिवर्त्तनेनः दंडा
भावे परिध्वंसी मात्स्यन्यायः प्रवर्त्तते ३८ जगदेतन्निराक्रंदं कामलोभादिभिर्वृतान् निमज्जमानं निरये राजा दंडेन धार्य
ते ३९ इहं प्रकृत्या विषयैर्वशीकृतं परस्परं स्त्रीधनलोलुपं जगत् सनातने वर्त्मनि साधुसेविते प्रतिष्ठते दंडभयोपपी
डितं ४० नियतविषयवर्त्ती प्रायशो दंडयोगाज्जगति परवशेस्मिन्दुर्लभः साधुवृत्तः कृशमथ विकलं वा व्याधितं वाध
नं वा पतिमिच्च कुलनारी दंडनीत्याभ्युपैति ४१ इति परिगणनार्थः प्राप्तमार्गानुसारी नियमयति यतात्मा यः प्रजा दंडनीत्या
श्रयुनरणमायप्राप्तमार्गंप्रचारः सविनदिव समुद्रं सम्पदस्तं विशन्ति ४२ इति कामंदकीये नीतिसारे विद्याविभागो व

ण्ये श्रीमद्भवस्यादंडमहात्म्ये च द्वितीयः सर्गः २ दंडं दंडीव भूतेषु धारयन्धरणीपतिः प्रजाः समनुगृह्णीयात्प्रजायत्तिरिव
५ स्वयं १ वाक्सूनृता दया दानं दीनोपगतरक्षणं इति संगः सतां साधुखेन सत्पुरुषव्रतं २ आविष्ट इव दुःखेन तदुद्धृतेन गरी
5 यसा समन्वितः करुणया परया दीनमुद्धरेत ३ न तेभ्योऽभ्यधिकाः सन्तः सन्ति सत्पुरुषव्रतेः दुःखपकार्णवे मग्नं दीनम
नुद्धरंति ये ४ दयामास्थाय परमां धर्मादविचलन्नृपः पीडितानामनाथानां कुर्यादश्रुप्रमार्जनं ५ आनृशंस्यपरो ध
र्मः सर्वप्राणभृतां यतः तस्मात्प्रजानृशंस्येन पालयेत्कृपणं जनं ६ न हि स्वसुखमन्विच्छन्पीडयेत्कृपणान्नृपः कृपणाः पी
डमानो हि मन्युना हंति पार्थिवं ७ को हि नाम कुले जातः सुखलेशेन लोभितः अल्पसाराणि भूतानि पीडयेदविचारयन्
८ आधिव्याधिपरीताय अद्य श्वो वा विनाशिने को हि नाम शरीराय धर्मापेतं समाचरेत् ९ आहार्यैर्धीयमानं हि रूक्षणां
दुःखेन त्रुट्यतां छायामात्रकमेवेदं पद्मपत्रोदकबिंदुवत् १० महावातहतिभ्रांतमेघमालातिपेलवैः कृपणं नाम महात्मानो
ह्रियंते विषयारिभिः ११ जलान्तश्चंद्रचपलं जीवनं खलु देहिनां तथाविधमिति ज्ञात्वा शश्वत्कल्याणमाचरेत् १२ जग
ज्जगतस्तथानुल्यं वीक्षेत क्षणभंगुरं स्वजने संगतं कुर्याद्धर्माय च सुखाय च १३ सेव्यमानस्तु स्वजनैर्महानति विराजते १ राम॰ ५

सुधानलइव श्रीमानप्रासादश्चंद्ररश्मिभिः १३ हिमांशुमालीनतथानवोत्फुल्लोत्पलं सरः १४ आनंदयति चेतांसि यथा
सज्जनचेष्टितं १५ ग्रीष्मसूर्यांशुसंतप्तमुद्वेजनमनाश्रयः मरुस्थलमिवोदग्रंत्यजेद्दुर्जनसंगतं १६ सतःशीलोपसंप
न्नानकुर्यादेवदुर्जनः अन्तःप्रविश्यदहतिशुष्कानवक्षामिवानलः १७ निश्वासोद्गीर्णहुतभुग्धूमधूम्रीकृताननैः वरमा
सीविषैःसंगंकुर्यान्नतुदुर्जने १८ दीयतेस्वच्छहृदयैःपिंडोयेनैवपाणिना मार्जारइवदुर्वृत्तःस्तमेवहिविलुंपति १९
असाध्यंसाधुमंत्राणांतीव्रंवाग्विषमुत्सृजन् द्विजिह्वंचदनंधत्तेह्यधोदुर्जनपन्नगः २० क्रीयतेऽभ्यर्हणीयायस्वजना
यपयांजलिः ततःसाधुजनःकार्योदुर्जनायहितार्थिना २१ ह्लादिनीसर्वभूतानांसम्यग्जनजिहीर्षया भावयन्नस्मां
मैत्रीविसृजेत्स्नेहिकींगिरं २२ निःसंमानोपहारिण्यावाचाप्रह्लादयेज्जगत् उद्वेजयतिभूतानिक्रूरवाग्धनदोपिसन् २३
हृदिविद्धइवात्यर्थंयथासंतप्यतेजनः पीडितोपिहिमेधावीनतांवाचमुदीरयेत् २४ नोद्वेगकारिणीवाग्विसृष्टात्म
शुभात्मकेकृंततिदेहिनांमर्मशस्त्राणीचवचांसिच २५ प्रियमेवाभ्यधातव्यंनित्यंसत्सुद्विषत्सुच शिखीवकेकामधु
रःप्रियवाक्कस्यनप्रियः २६ अलंक्रियन्तेशिखिनःकेकयामदरक्तया वाचाविपश्चितोत्यर्थंमाधुर्यगुणरक्तया २७ म

का.प्र.नी. रक्तस्य हंसस्य कोकिलस्य शिखंडिनः हरंति नन यथा वाचो यथा साधुविपश्चितां २८ गुणानुरागी श्रितिमान्मृदुधानोद
६ याचितः धनधर्माय विसृजेत्प्रियां वाचमुदीरयन् २९ ये प्रियाणि प्रभाषन्ते प्रयच्छन्ति च सत्कृतं श्रीमन्तो वन्ध्यचरिता
6 देवास्ते नरविग्रहाः ३० शुचिरास्तिक्यपूतात्मा पूजयेद्देवतां सदा देवतावद्गुरुजनं मानयेच्च सुहृज्जनं ३१ प्रणिपाते
न हि गुरून्सतो नूचान चेष्टितैः कुर्वीताभिमुखान्भूत्यै देवान्सुकृतकर्मणाः ३२ सद्भावेन हरेन्मित्रं सद्भावेन च बांधवा
न स्त्रीभृत्यान्प्रेमदानाभ्यां दाक्षिण्येनेतरं जनं ३३ स्वनिन्दा परकृत्येषु स्वधर्मपरिपालनं कृपणेषु दयालुत्वं स
र्वत्र मधुरा गिरः ३४ प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे गृहागते परिष्वंग शक्त्या दानं सहिष्णुता ३५ स्वसम
द्धिष्वनुत्सेकायरभद्वेष्यमत्सरः नान्योपतापि वचनं मौनव्रतचरिष्णुता ३६ बंधुभिर्बद्धसंयोगः स्वजने चतुरश्रता
तच्चित्तानुविधायित्वमिति वृत्तं महात्मनां ३७ सनातनेन वर्त्मेति साधुतिष्ठतामयं हिपथा गृहमेधिनां मतः अनेन ग
छ्रियतं महात्मनामिमं च लोकं परमं च विन्दति ३८ इतिपथ्यविनिवेशितात्मनो रिपुपथिगच्छति साधुमित्रतां न राम.
दवनिपतिमत्सराहते विनयगुणेन जगद्वशं नयेत ३९ कचनरपतिगर्वैः संगृहक्मप्रजानां मधुरवचनयोगा ६

ल्लोकमाह्लादयीत मधुरवत्र्वनर्पशैत्यपतोलालितसम्पदमपिहितलोकः संस्थितेमेदमेति ८० इतिकामंदकीनीतिसारे आत्मा
रक्षवस्थापनोनामतृतीयः सर्गः ३ स्वाम्यमात्यश्चराज्यंचदुर्गंकोशोबलंसुहृत परस्परोपकारीदंसप्तांगंराज्यमुच्यते १ एकां
गेनापिविकलमेतत्साधुनवर्तते तस्मात्सामग्र्यमन्विछन्कुर्वीतास्तुपरीक्षणं २ आत्मानमेवप्रथममिछेद्गुणसमन्वितं कुर्वी
तगुणसंपुक्तःस्वतत्रोपपरीक्षणं ३ साधून्नलेदेवलंदुणपमक्तानात्मभिः आत्मसंस्कारसंपन्नोराजाभवितुमर्हति ४ लोका
धाराश्रियोरंजाहुयपाडुष्यरिमहा जिष्णुम्पापद्वाधारे चिरमात्मनिसंस्कृते ५ कुलंसत्वंवयःशीलंदाक्षिण्यंक्षिपकारिता अ
विसंवादितासत्यंवृद्धसेवाकृतज्ञता ६ दैवसंपन्नताबुद्धिरक्षुद्रपरिवारिता शक्यसामन्ततनाचैवतथाचदृढभक्तिता ७ दी
र्घदर्शित्वमुत्साहः शुचितास्थूललक्षता विनीततताधार्मिकता गुणाःस्याभिगामिकाः ८ गुणैरेतैरुपेतःसन्नुपयुक्तमभिग
म्यते तथाचकुर्वीतयथागच्छेल्लोकाभिगम्यतां ९ प्रख्यातारंसमकूरलोकसंग्राहिसांगुचिं कुर्वीतात्महितकांक्षीपरीवारं
महीपतिः १० क्रूरेपिभोगपतामेतिपरीवारगुणोर्दपः नक्रूरपरिवारस्तुघालाकांतइवद्रुमः ११ विरुद्धानास्वतांमार्गेभस्वयं
तिमहीपतिंक्रूरात्मानस्तुसचिवास्तस्मात्सुसचिवोभवेत १२ विभूतिमाप्यपरमांःसतांसंभोगपताव्रजेत पात्स्कुसतोनति

काम॰नी॰ ष्वतिमात्रह्येव विभूतयः २३ असद्भिरसनामेव भुज्यन्ते धनसंपदः फलं किंपाकवृक्षस्य ध्वांक्षा भक्षन्ति नेतिरे २४ वाग्मीप्र
७ गल्भस्स्मृतिमानुदग्रो बलवान् वशी नेता दंडस्य निपुणः कृतशिल्पस्सुविग्रहः २५ पराभियोगप्रसहो दृष्टसर्वप्रतिक्रियः परछि
7 द्रानुपेक्षी च संधिविग्रहतत्त्ववित् २६ गूढमंत्रप्रचारज्ञो देशकालविभागवित् आदाता सम्यगर्थानां विनियोक्ता च पात्र
वित् २७ क्रोधलोभभयद्रोहदंभचापलवर्जितः परोपतापपैशून्यमात्सर्येर्ष्यानृतातिगः २८ वृद्धोपदेशसंपन्नः शक्तो
मधुरदर्शनः गुणानुरागी स्थितवानात्मसंपन्नकीर्तितः २९ इत्यादिगुणसंपन्ना लोकयात्राविदिप्सिरे निर्वृतप्रिनरीवासे
पत्रलोकः स पार्थिवः ३० आत्मसंपद्गुणैः सम्यक् संयुक्तो युक्तकारिणं पर्जन्यमिव राजानं प्राप्य लोकोभिवर्द्धते ३१ शुश्रूषा
श्रवणं चैव ग्रहणं धारणं तथा ऊहापोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ३२ दाक्ष्यं शैघ्र्यमनघामर्षशौर्यं चोत्साहलक्षणं गु
णैरेतैरुपेतः स न्नाजा भवितुमर्हति ३३ त्यागः सत्यं च शौर्यं च त्रय एते महागुणाः प्राप्नोति हि गुणान्सर्वानेतैर्युक्तो नराधिपः ३४
कुलीनाः शुचयः शूराः श्रुतवन्तोऽनुरागिणः दंडनीतेः प्रयोक्तारः सचिवास्सुमहीपतेः ३५ उपधाःशोधिताः सम्यगीहमानाः राम॰
फलोदयं तस्य सर्वे परिक्षेरन्सानुरागाकृताकृतं ३६ उपेत्य धीयते यस्मादुपधेति ततः स्मृताः उपायायोपधाञ्जेयात स्वामात्यान्परी ७

रूपेण २७ ख्यातोह्यभिजनवद्कुलशीलबलान्वितः वाग्मी प्रगल्भश्चक्षुष्मानुत्साही प्रतिपत्तिमान् २८ स्तंभचापलहीनश्च मैत्रः क्ले
शसहः शुचिः सत्वसत्वधृतिस्थैर्यप्रभावारोग्यसंयुतः २९ कृतशिल्पश्रुतः सूक्ष्मः प्रज्ञाधारणान्वितः दृढभक्तिरकर्त्ता वैरा
णां सचिवो भवेत् ३० स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चयः दृढता मंत्रगुप्तिश्च मंत्रिसंपत्प्रकीर्तिता ३१ त्रय्यां च दंडनी
त्यां च कुशलोऽस्य पुरोहितः अथर्ववेदविहितं कर्म कुर्याच्छान्तिकपौष्टिकं ३२ तादृग्वसांवत्सरेप्यस्य ज्योतिःशास्त्रार्थवित्तकः
श्राभिधानकुशलो होरागणितनलक्षिन ३३ साधुनेघामसात्मानां नाद्विषेभ्यस्तु बुद्धिमान् च सूक्ष्मनानाशिल्पं च
परीक्षेत गुणाढ्यं ३४ स्वजनेभ्योविजानीयात्कुलस्थानमवग्रहं परिकर्मस्वदक्षं च विज्ञानं धारयिष्णुतां ३५ गुणाढ्य
वं परीक्षेत प्रागल्भ्यं प्रतिभां नयात् कथायोगेन बुद्धेत वाग्मित्वं सत्यवादितां ३६ उत्साहं च प्रभावं च तथा क्लेशसहिष्णुतां धृ
तिं चैवानुरागं च स्थैर्यं चापदि लक्षयेत् ३७ भक्तिं मैत्रीं च शौचं च जानीयाद्व्यवहारतः संवासिभ्यो बलं सत्वमारोग्यं शी
लमेव च ३८ अस्तब्धतामचापल्यं वैराणां चाप्यकर्त्ततां प्रत्यक्षतो विजानीयाद्भद्रतां क्षुद्रतामपि ३९ कर्मानुमे
याः सर्वत्र परोक्षगुणवृत्तयः तस्मात्परोक्षवृत्तीनां फलैः कर्मविभावयेत् ४० साज्जमानमकार्येषु निवधुर्मंत्रि

काम॰नी॰
८

णेन्नयंगुरूणामिवचैतांनाधीमान्प्रपाद्यवनंनृपः ४१ नेत्रेश्वरेजगन्सर्वंनिमीलतिनिमीलतिःसूर्योदयेयथापद्मंनत्प्र
बोधेप्रबुध्यते ४२ नहोधयेज्जगल्लार्थंसंबुद्धेनयथानथाधीसत्त्वोद्योगसंपन्नैस्तत्कार्यंनत्समाहितैः ४३ नपश्यते
हिसुहृदस्तएवगुरवोमताः यएनमुत्पथगतंवारयन्त्यनिवारिताः ४४ मज्जमानमकुर्य्येषुसुहृदोधारयन्तियेनतंपते
नैवसुहृदोगुरवोगुरवोहितेनृपते ४५ कृतविद्योहिबलिनावृक्ष्णेरागेणरज्यतेरागानुरक्तचित्तःसन्किन्नकुर्यादसांप्रतं
४६ पश्यन्नपिभवत्यंधःपुमान्नागाबलस्कन्सत्र सुहृद्धेधौश्चिकिन्सन्तिनिर्मलैर्विनयांजनैः ४७ रागमानमदान्ध
स्यस्खलतःपृथिवीपतेःहस्तावलंबोभवतिसुहृत्सच्चिवचेष्टितं ४८ मदोद्धतस्यनृपतेः संकीर्णःसेवदंतिनःगच्छ
त्युन्मार्गयातस्यनेतारः खलुवाच्यतां ४९ भूगुणौर्वर्द्धनीयाश्चनहृद्धिनृपवृद्धये नस्माद्गुणवतीभूमिंभूत्यैभूयस्य॰
स्वकारयेत ५० सस्याकुरवनोपएयाखनिद्रव्यसमन्विता गोहितामूरिसलिलापुण्यैर्जनपदैर्वृता ५१ रम्यसकु
जरवनावारिस्थलपथान्विता अदेवमातृकाचेतिशस्यतेभूर्विभूतये ५२ सशर्करासपाषाणासाटवीनित्यतस्क काम॰
रारूक्षासकंटकवलासव्याला चेतिभूरभूः ५३ सुजीव्याभूगुणैर्युक्तः सानूपः पर्वताश्रयः शूद्रकारुवणिक्प्रायोम ८

हारंभः कृषीवलः ५४ सानुरागो रिपुद्वेषी पीडाकरसहः पृथुः नानादेशैः समाकीर्णो धार्मिकप्रभुभाक्तुनी ५५ ईदृग्जनपदः शास्तो
मूर्खव्यसनिनायकः तंवर्द्धयेत्प्रयत्नेन तस्मात्सर्वं प्रवर्तते ५६ पृथुसीमं महाख्यानं सुदृढप्राकारगोपुरं समावसेत्पुरं शैलसरिन्मरुवला
श्रयं ५७ जलवद्धान्यधनवत्तुंगकालसहं महत् दुर्गोहीनो नरपतिर्वाताभ्रावयवैः समः ५८ ऊदकं पार्वतं वार्क्षं मैरिणं धान्वमप्ये
वं प्रशस्तं शास्त्रमतिभिर्दुर्गं दुर्गोपचिंतकैः ५९ जलाधारायुधयंत्राढ्यं वीरयोधैरधिष्ठितं गुप्तिप्राधानमाचार्या दुर्गं सम्मनुमेनिरे
६० साधुसाराणि दुर्गाणि सुवृः सानूपजांगलाः निवासाय प्रशस्यन्ते भूभुजां भूतिमिच्छतां ६१ वद्धामानोल्पनिःस्त्रावः ख्यातः पू
जितदैवतः ईप्सितद्रव्यसंपूर्णो दृढ्याप्तैरधिष्ठितः ६२ मुक्ताकनकरत्नाढ्यः पितृपैतामहोचितः धर्मार्जितो व्ययसहः कोषः
कोषज्ञसंमतः ६३ धर्महेतोस्तथार्थाय भृत्यानां भरणाय च आपदर्थं च संरक्ष्यः कोषः कोषवता सदा ६३ पितृपैतामहो वश्यः संह
तो दत्तवेतनः विख्यातयोरषाजन्यकुशलः कुशलैर्वृतः ६४ नानाप्रहरणोपेतो नानायुद्धविशारदः नानायोधसमाकीर्णो नीरा
जितहयद्विपः ६५ प्रवासायासदुःखेषु युद्धेषु च कृतश्रमः अद्वैध्यः क्षत्रियप्रायो दंडो दंडविदां मतः ६५ त्यागविज्ञानसत्त्वाढ्यं महा
पक्षं प्रियंवदं आयतिक्षेममद्वैध्यं मित्रं कुर्वीत सत्कुलं ६६ समुत्पन्नेषु कृच्छ्रेषु दारुणेष्वप्यसंशयं दर्शयत्यनठ हृदयं कुलीनश्च तु

स्वतनाह ६० विल

कामं० नी० रक्षितं ६७ पितृपैतामहं मित्रं संबद्धं यद्धृदयानुगं महत्त्वसमुत्थानं मित्रं मित्रार्थमिष्यते ६८ दूरादेवाभिगमनं स्पष्टार्थहृदयानुगा
१९ वाक्सत्कृत्य प्रदानं च त्रिविधो मित्रसंग्रहः ६९ धर्मार्थकामसंयोगो मित्रात्तु त्रिविधं फलं यस्मादेतत्त्रयं न स्यात्तन्न सेवेत पंडि
तः ७० औरसं कृतसंबंधं तथा वंशक्रमागतं रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधं ७१ मुचितान्यागिता शौर्यं समानसुखदुः
खता अनुरागश्च दाक्ष्यं च सत्यता च सुहृद्गुणाः ७२ नदर्थेहानुरागश्च संक्षिप्तं मित्रलक्षणं यस्मिन्नेतन्न तन्मित्रं न तत्रात्मानं विनि
क्षिपेत् ७३ इति स्वराज्यं सकलं समीरितं परात्मनि व्याप्य धनं समाधृतं गृहीनमेतन्न हि पुलेन मंत्रिणा त्रिवर्गो नित्यशमुपैति शा
श्वतीं ७४ यथांतरात्मा प्रकृतीरधिष्ठितेश्वराचरं विश्वमिदं समश्नुते नृपान्तरेंद्रः प्रकृतीरधिष्ठितश्चराचरं विश्वमिदं सम
श्नुते ७५ प्रकृतिभिरितिसम्यगन्वितो जनपदमादरवान्सुपालयेत् जनपदपरिपालनाद्विरं स्पृशति नृपः परमां श्रियः परं ७६
प्रकृतिगुणसमन्वितः सुधीर्वैजनितनृपः स्पृहणीयतां परं सच भवति रणे सुविद्विषां प्रबलद्व श्वसनः पयोमुचा ७७ इति कामं
दकीनीतिसारे स्वाम्यमात्यजनपददुर्गकोषदंडमित्राणि चतुर्थः सर्गः ४ वृत्त्यर्थं वृत्तसंपन्नाः कल्पवृक्षोपमं नृपं अभियाय
गुणैर्युक्तं सेवेरन्ननुजीविनः १ द्रव्यप्रकृतिहीनोपि सेव्यते सद्गुणान्वितः भवत्याजीवनं तस्मात्फलकालान्तरादपि २ अपि स्था राम० १

एववदासीत सुख्यस्यन्यारिमनः स्कधानलेवानार्यसंपन्नाद्दुन्तिमीहेन पडिताः ३ अनात्मज्ञोन्त्यपद्वेषी वर्द्धयन्नपि संपदः मा
प्यापि महदैश्वर्यं सहन्नेन विपद्यते ४ लब्धावकाशोपि युक्तस्त्वात्मवान विकारवान् स्थानेस्थैर्यमवाप्नोति मतिकर्मसु नि
श्चितः ५ आपत्स्वापि च न दान्ते च यत्सार्थ्यादवसां नक्लिश्यपन्नपि कुर्वीतन लोकद्विमाचरेन्न इति लाघ्ययकसंश्लेषाम्रा
मुवन्सधिवेसनां रसोन भक्ष्यात्त दुं धुं सर्वेषां कामिकानुगुणाः ७ अपां प्रवाहो गांगोपि समुद्रं प्राप्यमनत्र सः भवन्त्ययेय
स्तद्विद्वान्त्रा श्रयेद सुभात्मकं ८ क्लिश्यपन्नपि हि मेधावी सुसंजीवन माचरेन्न नेनेह स्रोघ्यता मेति लोकेभ्य स्वनहीयते
९ अभिलक्ष्यास्थिरं पुरुषं ध्यानं सङ्गिन्नि षेवितं सवेन सिद्धिमन्विछन्ना [redacted] विंध्यमिवेश्वरं १० दुरापमपि लोकेस्मिन्यद्यद्वस्त्वमिवांछति नत्तदाप्नोति
मेधावी नस्यात्कार्यः समुद्यमः ११ आरिराधयिषुः सम्यगनुजीवी महीपतिं विद्याविनयशिल्पाद्यैरात्मानमुपपादये
त १२ कुलविद्याश्रुतौदार्यशीलविक्रमधैर्यवान वपुः सत्ववलारोग्यस्थैर्यशौचदयान्वितः १३ पैशून्यद्रोहसंभेदस्तव
लौल्यानृतानिराः स्तंभचापलहीनश्च सेवनं कर्तुमर्हति १४ दक्षता भद्रतादार्ढ्यं क्षान्तिः क्लेशसहिस्नुता संतोषः शीलसु

कामं० नी० १० त्साहो मंडयन्ननुजीवितं १५ अर्थशौचपरो नित्यं गुणैरेतैः समन्वितः भूतये भूतिसंपन्नं साधु विश्वासयेन्नृपः १६ प्रविश्य
सम्यगुचिते स्थाने तिष्ठेत्सुवेषवान् यथाकालमुपासीत राजानं विनयान्वितः १७ परस्थानासनं क्रौर्यमौद्धत्यं मत्सरं
त्यजेत् विग्रहकथनं चैव न कुर्य्याज्ज्यायसा सह १८ विप्रलंभं च मायां च दंभं स्तैन्यं च वर्ज्जयेत् पुत्रेभ्यश्च नमस्कुर्यात्
दुर्लभमस्य भूपते १९ न नर्मसचिवैः सार्द्धं किंचिदप्यप्रियं वदेत् नेहि मर्म्माण्यभिघ्नंति मुहासेनापि संसदि २० अनुरु
द्धासने दृष्टिं मुहुर्न्नान्यत्र विक्षिपेत् न ब्रूयात्किमपि न्यस्य निष्ठ्यूतं स विलोकयन् २१ कोत्रेत्यहमिति ब्रूयात्सम्यगाज्ञा
पयेति च आज्ञां चावितथीकुर्याद्यथाशक्त्याविलंबितं २२ उच्चैः प्रहसनं कासं ष्ठीवनं कुत्सितं तथा जंभणं गात्रभंगं च
पर्वास्फोटं च वर्ज्जयेत् २३ प्रविष्टस्यानुरागस्य चिन्ने वित्त त्वसमनः समर्थयन्त -- साधुभावेन भाषिते २४ तन्नि
योगेन वा ब्रूयादर्थेषु परिनिष्ठितं सुखप्रबंधगोष्ठीषु विवादे वादिनां मतः २५ विज्ञानच्छपि न ब्रूयाद्भर्तुः क्षिप्तोत्तरं वचः
प्रवीणोपि हि मेधावी वर्ज्जयेदभिमानितां २६ यदप्युच्चैर्विजानीयाच्चेत्तत्रापि कीर्त्तयेन्न कर्म्मणा न स्वं वैशिष्ट्यं कथयेद्धि रामं०
नयान्वितः २७ आपत्सु मार्गगमने कार्यकालात्ययेषु च अपृष्टोपि हितान्वेषी ब्रूयात्कल्याणभाषितं २८ प्रियं तथ्यं च १०

वदेद्धर्मार्थमेवच श्रद्दधानमसंचयपरोक्षं कटुमुत्सृजेत २९ परार्थे देशकालज्ञो देशकालेच साधयेत स्वार्थं च स्वार्थ
कुशलः कुशलेनानुकारिणा ३० गुह्यं कर्म च मंत्रं च न भर्तुः संप्रकाशयेत विद्विष्टं च विनाशं च मनसापि न चिंतयेत
३१ स्त्रीभिस्तस्तद्दर्शिभिः पापैर्वैरिभूतैर्निराकृतैः सकार्यं च प्रीसाहित्यं संसर्गं च विवर्जयेत ३२ वशभावानुकरणीन
कुर्यान्नृपिवीपतेः संपन्नोपि हि मेधावी स्पर्द्धेत न च तं नृपं ३३ रागापरागौ जानीयाभ्द र्तुः कुशलकर्मकृत् इंगिता-
कारचेष्टाभ्यामिंगिताकाराविविन ३४ दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् दिशत्यासनमभ्यासे कुशलं
परिपृच्छति ३५ विविक्तदर्शनस्थाने रहस्येच न शंकते न दर्यान्तः कृतां श्रोत्रे संकथयति सा कथा ३६ श्लाघते श्लाघ
नीयेषु श्लाघमानं च नंदति कथान्तरेषु स्मरति प्रकृष्टः कीर्तयेद्गुणान् ३७ सहतेपथ्यमप्युक्तं न निंदामनुमन्यते कृ
तेति वाक्यं पूजयेत्सोपहास्तद्धं वा वहु मन्यते ३८ उपकारेषु मध्यस्थं दर्शयत्यभुजेस्वपि नच्छन्नं कर्म चान्येन कृतमभिन्नविधी
यते ३९ विपत्समुत्थाय यति विनाशं चाप्युपेक्षते कार्ये सवर्द्धयत्याशां फले च क्रूरतेन्यथा ४० यद्वाक्यं मद्यकं किंचि
न रम्यपर्यं मनीषुं रक्षा च रत्यात्म संसत्सु परिवादं च केवलं ४१ अकोपोपि सकोपाभः मसन्नस्त्वापि निष्फलवदन्यक

कामं॰ नौ। स्याद्दुःखेति रूक्षं स्वमुहृन्मीक्षते ४२ विज्ञाप्यमानो हन्यर्थं सद्व्यो न्यायसंगति अथ यद्वदयति मंत्राणि बूवन्हा स्वमप्यपृते॰
११ ४३ संभावयति दोषेणाद्वि विद्वेष्टं करोति च साधूक्तमपि नद्वाक्यं समर्थयति चान्यथा ४४ अपवीणाकथाभंगक॰
॥ रोति विरक्तो भवन्नुपास्यमानः शयने सुप्तलक्ष्याणि पश्यति ४५ यत्नेन बोध्यमानोपि सुप्तवंत्र विचेष्टते दृष्ट्यादिग्ध
मुरक्तस्य विरक्तस्य च लक्षणं ४६ रक्ता वृत्तिं समीहेत विरक्तस्य विवर्जयेत् निर्गुणस्य हि भर्तारं मापन्मुनपरित्य
जेत् ४७ ततः परो नास्ति यस्यापुन्नयति पश्यते सुष्यवृत्ते षु सत्वा प्राज्ञेव यान्त्यभिलक्षतां ४८ वियत्स्वधर्मधुयो
णां ते षां नामाति रिच्यते स्रो आचानंदनी त्वेवमहतामुपकारिणा कालेकल्याणमाधत्ते स्वल्पापि सुमहोदयं ४९ अकार्यप्रति
तिषेधं च कार्ये चैवानुवर्तनं संक्षेपादिति सद्वृत्तं बंधुमित्रानुजीविनां ५० पात्रसौ वृत्तगोष्ठीषु राजानमभितः स्तुणःवो
धयेयुः प्रमाद्यंतमुपायैर्नाडिकादिभिः ५१ राजानं ये स्वरूपे स्वम्ने सज्जमानं विवस्नेसु नेगच्छन्त्यकृतात्मानः सह तेन पराभव
५२ जयात्राणपयजीवेति ना यदेवेति वादरान आज्ञामस्य मनोज्ञेष्ठन्नो मन्साकुर्युरुपासनं ५३ भस्त्रिविज्ञानुवृत्तिं च सदुत्तम
नुजीवनं रक्षां स्यपि हि गच्छन्तेनिसंकुदानुवृत्तिभिः ५४ धीसत्वोद्योगयुक्तानां विमृत्युरपं महात्मनां कुदानुवृत्तिनां लो राम॰ ११

के परः प्रियवादिनां ५५ अलसस्याल्पदोषस्य निर्विद्यस्याकृतात्मनः प्रदानकाले भवति मानना पिहितपराङ्मुखी ५६ ये शूराये
पि हि दक्षाः सेवे च सेवाविपश्चितः तेषामेव विकाशिन्यो भोग्या प्रति संपदः ५७ अप्रियोपि हि पथ्यः स्यादिति वृद्धानुशासनं वृ
द्धानुशासने तिष्ठन् प्रियतामधिगच्छति ५८ आजीव्यः सर्वभूतानां राजा पर्जन्यवद्भुवि निराजीव्यं त्यजन्त्येनं शुष्कं वृक्षमि
वाण्डजाः ५९ कुलं वृत्तं च शौर्यं च सर्वमेतन्न गम्यते दुर्वृत्तेप्यकुलीनेपि जनो दातारि रज्यते ६० लक्ष्मीरेवान्वयो लोके न ल
क्ष्म्याः परमोन्वयः यस्मिन्कोशो बलं चैव न तस्मिंल्लोकोनुगच्छति ६१ उत्थिता एव पूज्यन्ते जनाः का पार्थिवैर्नरैः शत्रुवत्पति
तं कोनुवदते मानवं पुनः ६२ अर्थार्थी जीवलोकोयं ज्वलन्तमुपसर्पति क्षीणक्षीरां निराजीव्यां वत्सस्त्यजति मातरं ६३
अहापयन्नृपः कालं भृत्यानामनुजीविनां कर्मणामनुरूपेण वृत्तिं समनुकल्पयेत् ६४ काले स्थाने च पात्रे च पानहि वृत्तिं
विलोपयेत् एनद्वृत्तिविलोपेन राजा भवति गर्हितः ६५ अपात्रवर्षिणं राजानं नु न पथ्यस्त्वविगर्हितं अपात्रवर्षिणादन्यः किं स्याल्लो
कस्य पातने ६६ कुलं विद्यां श्रुतं शौर्यं शीलं भूतपूर्वतां वयोवस्थां च संप्रेक्ष्य आद्रियेत महात्मना ६७ कुलीनान्नावमन्ये
त सम्यग्वृत्तान्मनस्विनः त्यजन्त्येतेवमन्तारं प्रतिवाममानहेतुना ६८ गुणैरुदारैः संयुक्तानश्रोनेयेन्न ध्यमाधमान्महत्वमासु

काम०नी० वन्यस्त्वेषद्वयन्निनरेश्वरं ६९ उत्तमाभिजनोपेतो न नीचैः सह वर्द्धयेन कृशोपि हि विवेकस्थो याति संश्रयणीयतां ७० निर्लो
१२ केस्मिन्न्यासेनेन त्रपंडिताः ज्ञानस्य हि मणेर्येव काचेन समतां मता ७१ विश्राम्यंति महात्मानो यत्र कल्पतराविव सच्छ्रो धंजी
12 वंति श्रीमान्स्ततं भोगफलाः श्रियः ७२ लक्ष्म्या लक्ष्मीवतां लोके विकाशिन्याच किंनया वंधुभिश्च सुहृद्भिश्च विश्रब्धं यान
भुज्यते ७३ आपद्द्वारेषु सर्वेषु कुर्यात्सामान्यरीक्षितान् आदद्दीत धनं तेभ्यो भास्वानुस्रैरिवोदकं ७४ अभ्यस्तकर्मणस्तज्ज्ञा
न् शूचीन्स्तज्ज्ञान सम्मतान् कुर्यादुद्योगसम्पन्नान ध्यक्षान्सर्वकर्मसु ७५ यो यद्वस्तु विजानाति तं तत्र विनियोजयेत् अशेषवि
षयप्राप्ताविन्द्रियार्थइवेन्द्रियं ७६ कोष्ठागारेषु भिप्रक्रमस्तत्तदायतं हि जीवितं नाम्पायं च व्ययं कुर्यान्नसवेक्षेन चान्वयं ७७
कृषिर्वणिक्पथो दुर्गं सेतुः कुंजरबंधनं खन्याकर धनादानं शून्यानां च निवेशनं ७८ अष्टवर्गमिमं साधुः स्वद्धृत्तोपि
वर्द्धयेन जीवनार्थमिहाजीवैः कर्त्तव्यः करणाधिकैः ७९ पंपायपेहवृत्तेनवृ याक्षीणोपि पार्थिवः नस्यान्नस्यानुसंरोधं कु
र्यान्नरोपजीविनां ८० सुसंरक्षेद्वृत्तिपुण्यां सस्यकांटकथ्यायवयाफलायलगुडः कार्यस्तेनो भोग्यमिदं जगत् ८१ आयुक्त एप०
केभ्यश्चौरेभ्यः परेभ्यो राजवल्लभात् पृथिवीपतिलोभाच्च प्रजानां पंचधा भयं ८२ पंचप्रकारमप्येतदपोह्य नृपतिः स्व १२

पं प्रार्द्दीनफलं काले त्रिवर्गपरिवृद्धये ८३ यथा गोपालसने काले दुह्यते च न पा प्रजाः सिच्यते चीयते चैव लताः पुष्पफला
र्थिना ८४ आस्वादयेदुपचितान्साधु दुष्टव्रणानिव आयुक्तास्ते च वर्तेरन्स्वदूनाविव महीपतौ ८५ स्वल्पमप्यपकुर्वन्ति येपा
पाः पृथिवीपतौ नेव क्ष्माविवरदस्तेन पनं गाम्रूढचेतसः ८६ संवर्द्धयेत्सदा कोषमाप्तैस्तैरविछिन्नं काले चास्य व्ययं कुर्या
त्त्रिवर्गपरिवृद्धये ८७ धर्मार्थं प्रक्षीणकोषस्य क्षतत्वमपि शोभते सुरैः पीतावशेषस्य शरद्धिमरुचेरिव ८८ वृहस्पतेर्यवि
श्वास इति शास्त्रार्थनिश्चयः अविश्वासी न यात्रस्याद्यावच्च व्यवहारवान् ८९ विश्वासयेदविश्वस्तं विश्वस्तं नातिविश्व
सेन यशक्तिविश्वासमायाति विभूतेपात्रमेव सः ९० प्रादुर्भवन्मन्त्रसमय परस्याच्छिद्राण्यनुस्मरण तस्माद्योगीव सततं नता
निपद्येत्समाहितः ९१ अनुगतपरितोषितानुजीविमधुरवचश्चरितानुरक्तलोकः सुनिपुणपरमाप्तशक्तितन्त्रो भवति
नृपः सुचिरं प्रदीप्तरश्मिः ९२ इति कामन्दकीये नीतिसारे स्वाम्यनुजीविवृत्तं पंचमः सर्गः ५ लोके वेदे च कुशलैः कुशलैः
परिवारितः आवृतश्चिन्तयेद्राज्यं सबाह्याभ्यन्तरं नया १ अभ्यन्तरं शरीरं स्वं राज्यं राष्ट्रमुदाहृतं अन्योन्याधारसंवधाद्
कमेवेदभिधीयते २ राज्याङ्गानां तु सर्वेषां राष्ट्राद्भवति संभवः तस्मात्सर्वप्रयत्नेन राजा राष्ट्रं प्रसाधयेत् ३ लोकानुग्रहमन्वि

कामं०नी० ह्यशरीरमनुपालयेत राज्ञः संरक्षणं धाम: शरीरं धर्मसाधनं ६ धर्म्मोमारभिरेरेहिरसामभिषिकल्पाः महीभुजः तस्मादसाधू
१२ मापिक्षान्निम्नन्यापैर्न लिप्यते ५ धर्मसंरक्षणपरो धर्मे रार्थं विवर्द्धयन् ये ये प्रजाप्रबाधेरक्षांछिद्याम्नहीपतिः हृयमा
13 प्यीः क्रियमाणाहि शंसन्त्यागमवेदिनः सधर्मोपविगर्हेक्षितमधर्मप्रचक्षते ७ धर्माधर्मौ विजानन्हि शासने: भिर
तेः सतो प्रजाः रक्षेन्नृपः साधु हन्यात्त्व परिपंथिनां ८ राज्योपघाते कुर्वीरन्ये या पापजवल्लुभाः एकैकशः सहता वाह्
यां स्तानपरिचक्षते ९ दुष्यात्रयां शुदंडेन हन्याद्राजा विलं विना अहष्णंवा प्रकाशं वालोकद्वेषसमागतान १० राजा रह्
सि हूष्यं हि हत्वा नायोपमंत्रयेत् गूढशास्त्रविशेषेयुस्तत्त्वशादांसजितान याः ११ विश्वस्तांस्तानिविनुपुद्धोस्याः कस्मानरं
गतान ते शास्त्रग्राह कानूपुः प्रयुक्तास्मइति स्फुटं १२ इति दुष्यान्ससहृद्य प्रजानामभिवृद्धये विनयाम्निपउत्कर्षे राजरा
ल्प समुद्धरेन् १३ यथाबीजांकुरः सूक्ष्मोपरिप्रयत्नोभिरक्षितः कालेफलाय भवति साधुस्तद्वदियं प्रजा १४ उद्वेजयति भी
क्ष्णेनमृदुनापरिभूयते तस्माद्यथाहतो दंडं नयेन्मध्यममाश्रितः १५ इति कामंदकीये नीतिसारे कंटकशोधनो नाम षष्ठः रा०म०
सर्गः ६ प्रजार्थं श्रेयसे राजा कुर्वीतात्मजरक्षणं लोलुभ्यमाना स्तेर्थे गृहं त्यारेनमरक्षिताः १ राजपुत्रा मदोद्धृता गजा इव १३

चिरं कुर्याः प्रातनं वा विनिघ्नन्ति पितरं स्वाभिमानिनः २ राजपुत्रैर्मदोपेतैः प्रार्थ्यमानमिव स्तनः दुःखेन रक्ष्यते राज्यं व्याघ्राघ्रा
णमिवामिषं ३ रक्ष्यमाणा यदि छिद्रं कथंचित्प्राप्नुवन्ति ते सिंहशावा इव घ्नन्ति रक्षितारमसंशयं ४ विनयोपग्रहान्भूत्यैः कुर्वी
त नृपतिः सुतान् अविनीतकुमारं हि कुलमाशु विनश्यति ५ विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेत् दुष्टं गजमिवोद्वृत्तं कुर्वी
त सुखबंधनं ६ राजपुत्रः सुदुर्वृत्तः परित्यागं हि नार्हति क्लिश्यमानः स पितरं परेणाश्रित्य हन्ति हि ७ व्यसने सज्जमानं हि क्लेश
येद्व्यसनाश्रयैः तथा च क्लेशयेदेनं यथा स्यात्पितृगोचरः ८ यानेशय्यासने पाने भोज्ये वस्त्रविभूषणे सर्वत्रैवाप्रमत्तः स्याद्दु
ष्टेन विषदूषिते ९ विषघ्नैरगदैः स्नातो विषघ्नमणिभूषितः परीक्षितं समश्नीयाज्जांगुलीविद्भिरन्वितः १० भृंगराजः शुक
श्चैव सारिका चेति पक्षिणः क्रोशन्ति भृशमुद्विग्ना विषपन्नगदर्शनात् ११ चकोरस्य विरज्येते नयने विषदर्शनात् सुव्यक्तं माद्य
ति क्रौंचो म्रियते मत्तकोकिलः १२ जीवंजीवस्य च ग्लानिर्जायते विषदर्शनात् एषामन्यतमेनापि समश्नीयात्परीक्षितं १३
मयूरपृषतास्संगे न भवन्ति भुजंगमाः तस्मान्मयूरपृषतो भवने नित्यमुत्सृजेत् १४ भोज्यमन्नं परीक्षार्थं प्रदद्यात्पूर्वमग्नये व
योभ्यश्च ततो दद्यात्तत्र लिंगानि लक्षयेत् १५ धूमार्चिर्नीलता वह्नेः शब्दस्फोटश्च जायते अन्नेन विषदिग्धेन वयसां मरणं भ

का०म०टी० वेन १६ अखिन्नतासोरकलमाशुशैसं विवर्णताअन्नस्यविषदिग्धस्यतथास्निग्धश्रमोचकः १७ व्यंजनस्याशुशुष्कत्वंक्व
१७स० थनेश्यामफेनता गंधस्पर्शरसाश्चैव नश्यन्ति विषदूषणात् १८ स्वाद्यातिरिक्ताहीनावास्वादवसेविषदूषिते दृश्यतेराजिरू
14 र्ध्वाचफेनमंजनमेवच १९ रसस्यलीलापयसश्चनाम्राम्रस्यमोपस्यचकोकिलाभा श्यामावदध्योविषदूषितस्यमध्ये
भवन्त्यूर्ध्वगनावलेखा २० आर्द्रस्यसर्वस्यभवेत्तुसंद्यःप्रम्लानभावोविषदूषितस्य उत्पक्वनाशःक्वथितोनभावासश्याम
ताचेतिभवन्तितज्ज्ञाः २१ शुष्कस्यसर्वस्यविषोपदेहाद्विशीर्णताचाशुविवर्णताच खरत्वंमृदुस्यान्मृदुनःखरत्वंनदानिकेचा
पकंजनुधानः २२ माचाणमरणानांचमैणीश्यामामंडलकीर्णता ननुलीयक्षमणीलोम्नास्याम्नंशस्त्रविघाश्रयात् २३
लोहानांचमणीनांचमलपंकोपदग्धता प्रभावस्नेहगुरुतावर्णस्पर्शवधस्तथा २४ मुखस्यश्यामतावर्णेत्वत्व[illegible]
जंभणंमुहुःस्खलनंपथुःस्वेदआवेगोदिग्विलोकनं २५ स्वकर्मणिस्वभूमौस्यादनवस्थानमेवच लिंगान्येतानिनिपुणः
लक्षयेद्विषदायिनां २६ औषधानिचसर्वाणियानंपानीयमेवच उत्कम्प्यकैःसमाख्यायाभ्याश्रीयात्तोजनानिच २७ प्रसा रस०
धनादियत्किंचित्तत्सर्वंपरिचारिकाःउपतिष्ठेयुर्नरेंद्रायसुपरीक्षितमुद्रितं २८ परस्यादागतंयच्चनचतुसंवेपरीक्षयेत्स १७

दास्वोपपरेभ्यश्च रक्षोरजासुरक्षिता २९ यानं वाहनमारोहेद्यातं यात्रोपपादितं अविज्ञातेन हि पथा संकटेन न संव्रजेन्नरः
वीक्षितमदुष्टकर्माणिमारुह्य वंशकं मागनं संविभक्तश्च कुर्वीत जनमासन्नवर्जितं ३१ अधार्मिकाश्च क्रूरं श्वदंष्ट्रदोषान्वि
एकक्तान परेभ्योभ्यागतानां श्रेवृहरैणेव समाचरेत् ३२ महावासमुद्भूतमपरीक्षितननाविकौ अन्यनौप्रतिवंधाद्दालोपेया
त्रावमानुरी ३३ परितापिष्णुवासरेषु पश्चंस्तटलेस्वाध्यिनमासस्सैन्यचक्रे स्वविशोधितन क्रमीनजालं व्यवगाहेत जलं
सुहृत्सेमेनः ३४ गहनानि विवर्ज्जयन्निश्शुद्धं च हिरूढ्यानवनं समुम्नुपेयात विरहमधुरं वयोनुरूपीन च माद्यद्विषयोप
भोगरणगान ३५ सुविनीतसुवेषपथ्यपानः सुखगम्यामुविनाच लक्ष्यसिद्धौ सुपरीक्षितरक्षितानुसीमां लघुकोषसमुप
गादवीमुपेयात् ३६ कान्येष्वनशोधनमादौ मानुरं निक्रमपि प्रविविक्षुः आमषणस्यनुगतश्च विशेषु संकटे च गहनेन
च तिष्ठेत् ३७ पांशूत्करणकुपितनिवाततिवाते सेसक्तधारणजलदे च देवे अन्यातपेचाहिततां धकारे स्वस्थस्तुसंवृतः क्वचित्
मुपेयात् ३८ निर्गमे च सुप्रवेशे च राजा मार्गो समं ततः प्रोत्सारितजनं गच्छेत्सम्यगाविष्कृतोन्नतिः ३९ यात्रोत्सवेष समावे
तुजलसंबाधशालिनः प्रदेशान्नावगाहेत नातिवेलं च संपतेन ४० निषेवितो वर्षधरैः कंचुकोष्णीषधारिभिः अनेनः पु

कां०नी० रक्षश्चिरेत्कुब्जकैरातवामनैः ४१ निचैरंतःपुरमाल्याम्युच्चयश्चिन्नवेदिनः शास्त्राग्निविषवर्जैहि नर्ममेसुमहीपतिः ४२
१५ श्रंतवासकसैन्यंचसमंद्धंसाधुसंमतं रक्षेदायुक्तकुशलमन्तःपुरगंनपं ४३ आशीतिकाश्चपुरुषाःपंचाशत्काश्च
15 योषितः वुधेरन्नवरोधानंशौचमागारिकाश्चये ४४ रूपाजीवाःस्त्रियःस्नाताःपरिवर्तितवाससः राजानमुपतिष्ठेयु
र्विशुद्धस्रग्विभूषणाः ४५ कुब्जकैरातिलैश्चैवमुण्डैश्चालानगोजनः संसर्गोनक्वचिद्धृष्ठेदाल्वैरासीजनैःसह ४६
निर्गच्छेत्सविशेद्वापिसर्वोऽभ्यन्तरगोजनः विज्ञातद्रव्यसंचारीकरणेनोपलक्षितः ४७ नचानुजीविनंपश्येदकल्प
पृथिवीपतिः अन्यत्रात्ययिकात्कोर्यापूर्वंस्येवानुरोगुरुः ४८ स्नातानुलिप्तसुरभिःस्रग्वीरुचिरभूषणः स्नातांसुदंनव
सनांगच्छेद्देवींसुभूषणां ४९ नहिदेवीगृहंगच्छेदात्मीयामन्त्रिवेश्मनात देवीगृहगतंभ्राताभद्रसेनममारयत् ५०
मातुःशय्यान्तरालीनःकारूषंचौरसःसुतः लाजान्विषेणसंयोज्यमधुनेतिविलोभितं ५१ देवीतुकाशिराजेन्द्रंनिजघा
नरहोगतं विषाक्तेनचसौवीरंमेखलामलिनानृपं ५२ नूपुरेणचवैरूप्यंजारूष्यंदर्पणेनच वेण्यांशस्त्रंसमाधा
यनषाचापिविदूरथं ५३ इतिवर्जंपरिहरेच्छौवापिमयोनयेनयस्यदाराः सुगुप्ताःस्युःपुरुषैराप्तकारिभिः ५४ सर्वं राम० १५

येगाच्छितत्रसपहस्तेलोकद्वयंपश्यतिं धर्ममित्थत्वरपतिः सर्वान्वाराननुक्रमात् ५५ गच्छेदनुनितांनिसंवाजीकरणाद्बृंहितः
५६ विचार्यकार्याण्यपवादमिन्दयेविसृज्यलोकंसमताहन्तक्रियः सशास्त्रवंधेनहिसाप्नुयातोनास्त्रयत्नसत्कः पर
मामवाप्नोति ५७ नयनेनजागृतिरसंतरस्यभृशं सुखंस्वपंतीहनिराधयः प्रजाः समन्तवित्तेस्वपतित्रसपस्याम्यजागरे
णास्यजगम्यबाधने ५८ इतिस्मपूर्वंमनुर्याद्भाषिरेन्द्रपस्यराज्यस्यचसाधुलक्षणं सदेनदेवंपरिपालयन्नेषापान्ते
ष्वारः पालनकल्पनांव्रजेत ५९ इति कामंदकीये नीतिसारे पुत्ररक्षणामात्यरक्षणं च सप्तमः सर्गः ७ येनकोष
दंडाभ्यां सामात्यः सहमंत्रिभिः दुर्गस्थश्चिंतयेत्साधु मंडलं मंडलाधिपः १ थीवृराजनेराजाविशुद्धेमंडलेचरन्
अशुद्धेमंडलेसर्पेनशौर्येनेरप्यवचन २ सेवंतेसर्वभूतेभ्यः शशीवास्वराडमराडलः राजा संपूर्णमंडलः स्तस्माद्विजिगीषुः सदाभवेत् ३
अमात्यराष्ट्रदुर्गाणिकोशोदंडश्चपंचमः राजामक्षनयस्तसैर्विजिगीषोरुदाहृताः ४ राजापंचनयाभिर्ज्ञसप्तमः पृथिवीपतिः सप्त
प्रकृतिकं राज्यमित्युवाचवृहस्पतिः ५ संपन्नस्तुप्रकृतिभिर्महोत्साहः कृतश्रमः जेतुमेषणशीलश्च विजिगीषुरितिस्मृतः ६ कोसीनवृद्ध
सेविलसुत्साहस्थूललक्षनाचित्तज्ञतामवृद्धिमालेप्रागल्भ्यंसत्यवादिता ७ अदीर्घसूत्रतामाक्षौद्र्यमश्रयस्वमधानतादेशकालज्ञ

काम०नी० तादात्म्यं सर्वक्लेशसहिष्णुता ८ सर्वविज्ञानिता दाक्ष्यं सत्त्वं संवृतमंत्रिता अविसंवादिता शौर्यं भक्तिज्ञत्वं कृतज्ञता ९ शरणागत
१६ वात्सल्यममर्षित्वमचापलं स्वकर्मदृष्टशास्त्रात्वं कृतित्वं दीर्घसूयिता १० जितश्रमित्वं धर्मित्वमक्रूरपरिवारिता महानस्फीतता
16 चेति विजिगीषुगुणाः स्मृताः ११ सर्वैर्गुणैर्विहीनोऽपि स्वराजाय प्रतापवान् प्रतापयुक्ता नृपयंति परे सिंहान्मृगा इव १२ प्रताप
सिद्धो नृपतिः प्राप्नोति महतीं श्रियं नश्यादुत्थानयोगेन प्रतापं जनयेन्नरं १३ एकाग्राभिनिवेशित्वमविलक्ष्यामुच्यते दारुण
स्तुस्मृतः शत्रुर्विजिगीषुगुणान्वितः १४ लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः मूढो योधावमन्ता च सुखच्छेद्यो रिपुः स्मृ
तः १५ अरिमित्रमरेर्मित्रमरिमित्रमतः परं तथारिमित्रमित्रं च विजिगीषोः पुरःस्थिताः १६ पार्ष्णिग्राहः स्मृतः पश्चादाक्रन्द
स्तदनंतरं आसारावारयोश्चैव विजिगीषोस्तु मंडलं १७ अरेस्तु विजिगीषोस्तु मध्यमो भूम्यनंतरः अनुग्रहे संहतयोः सम
र्थो व्यस्तयोर्वधे १८ मंडलाद्बहिरेतेषामुदासीनो बलाधिकः अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः मूलप्रकृतयस्त्वेताश्च
तस्रः परिकीर्तिताः अहेवमंत्रकुशलश्चतुष्कमंडलं मयः २० विजिगीषुररिर्मित्रं पार्ष्णिग्राहोऽथ मध्यमः उदासीनः पुनर्मे द्वेषके
मंडलमृचनुः २१ उदासीनो मध्यमश्च विजिगीषोस्तु मण्डलं शत्रुनाम मंडलमिदं प्राह द्वादशराजकं २२ द्वादशानां नरेंद्राणामर काम० १६

मित्रेण पृथक्पृथक् षड्विंशत्कमिदं प्राहुस्तच्चैव पुनर्मयः २३ द्वादशानां नरेंद्राणां पंच पंच पृथक्पृथक् अमात्याद्याः प्रकृतयो गम
नन्नीहमानवाः २४ मौना द्वादशराजानो ह्यमात्याद्यास्तथापरे ये सप्तमिश्रधिकं तेषां सर्वप्रकृतिमंडले २५ संयुक्तस्त्वरिमि
त्राभ्यां सुमयारिस्तथासुहृन् मौना द्वादशराजानस्तथा दशकं गुरुः २६ अष्टादशानामेतेषां मित्रामात्याद्याः पृथक्पृथक् अष्टो
त्तरशतेनैतेन मंडलं कवयो विदुः २७ अष्टादशानामेतेषां मित्रशत्रुपृथक्पृथक् चतुःपंचाशत्कमिति विशालाक्षः प्रभाषते २८ च
तुःपंचाशतो राज्ञाममात्याद्याः पृथक्पृथक् चतुर्विंशतिसंयुक्तं मंडलं त्रिशतं स्मृतं २९ सप्तप्रकृतिकं प्रोक्तं विजगीषोररेश्च तत्
चतुर्दशकमेवैतन्मंडलं परिचक्षते ३० समंडलत्रिकमित्याहुर्विजगीष्वरिमध्यमाः मित्रयुक्ताः पृथक् चैते षड्भिरन्ये जगुः ३१ अ
मात्याद्याः प्रकृतयः एकैकस्यैव भूपतेः मंडलं मंडलविदः षड्विंशत्कं प्रचक्षते ३२ सप्तप्रकृतिकाः सर्वे विजगीष्वरिमध्यमाः
एकविंशतिकमित्याहुरपरे नयवादिनः ३३ चत्वारः पार्थिवाः मौनाः पृथक् मित्रैः सहाष्टकं अमात्यादिभिरन्ये च जगतस्त्वेसं
मितं ३४ विजगीषोः पुरस्ताद्ये पश्चाद्ये प्रकीर्त्तिताः दर्शकं मंडलमिदं मंडलज्ञाः प्रचक्षते ३५ दशानां भूमिपालानाममात्या
द्याः पृथक्पृथक् मंडलं मंडलविदः षष्टिसंख्यं प्रचक्षते ३६ प्राग्गेहान्द्वौ विजगीषोश्च पश्चिमौ चेति पंचकं अमात्याद्याः प

 यत्केषांचिन्मतं परिचक्षते ३७ अरेरप्येष यद्वेति दृष्टोदृष्टिमतां वरैः पंचकं मंडलं न्यायं त्रिनयं च मनीषिभिः ३८ एवमष्टानिन्या
 य्यारस्तु वाचयगणाः अभियोक्ता प्रधानत्वात्तत्र यावान्योऽभियुज्यते ३९ यणस्य अभियोगेन विजगीषोररेस्तथा अखिलविज
 गीषुत्वेण कामं कुर्निरिष्यते ४० इति प्रकारं बहुधा मंडलं परिचक्षते सर्वलोकप्रतीतं तु स्फुटं द्वादशराजकं ४१ अग्रपश्चात
चतुर्मूलं षष्ठियत्रं द्वे येस्थितं षट्गुण्यं विफलं वृक्षं यो जानाति स कीर्तितम् ४२ पार्ष्णिग्राहस्तथासारः पश्चात्तु मित्रेभ्य कीर्तिते
आक्रंदो यत्र दासारो विजगीषोर्हदाहृते ४३ पुरो यायाद्विगद्धैव मित्राभ्यां पश्चिमावपि पश्चिमाविव पूर्वाभ्यामरिजन्मित्रमे
वच ४४ अरिमित्रस्य मित्रस्तु कृतकृत्येन भूयसा स सयुज्याभयमित्रेण पश्चाद्धृष्ठेत्तरेश्वरः ४५ आक्रंदेनात्मनाचैव पार्ष्णि
ग्राहं प्रपीडयेत् आक्रंदेन तदासारमाक्रंदासारमाशिना ४६ मित्रेणैवात्मनाचैव कुर्वीताद्धदरेणरियोः मित्रेणहि समित्रे
णारिपुमित्रं प्रपीडयेत् ४७ अरिमित्रस्य मित्रस्य पीडनं पृथिवीपतिः कुर्वीतोभयमित्रेणामित्रेण चैव हि ४८ अनेनक्रम
योगेनविजगीषुः सदोत्थितः पडयेदहितं शत्रुं मित्रेणामलमलरा ४९ पीड्यमानोत्यभयतः सदोषुकैर्मनीषिभिः रिपु 
रुद्धेदमायातितद्वशेवावतिष्ठते ५० सर्वोपायेन कुर्वीत सामान्यं मित्रमात्मसात् भवन्ति मित्राद्दुस्थिताः सुखेष्ठेयाहिमन्त्र 

चविजानातिनिजोरिपुः दहत्यन्तर्गतश्चैवशुष्कवृक्षमिवानलः ६२ वर्त्ततेपक्षपातेनमित्रंषड्भयात्मकं वज्रीवहिस्त्रिशिरसंतन्तुछिं
द्यात्कृतत्वरः ६३ बलिनाविग्रहीतस्यद्विषतःकूलवर्त्तिनः कुर्वितापचयंशत्रोरात्मोच्छित्तिविशंकया ६४ यस्मिन्नुच्छिद्यमाने
तुरिपुः स्वंप्रवर्त्तते नतस्योच्छित्तिमचिरात्कुर्वीतेनंसुगोचरं ६५ वंशागतोरिपुर्यस्तुविंधनेदुरूप्यगृहः तस्यसंयमा
नायाशुतत्कुर्वीतेनंसुगोचरं ~~६५ वंशागतोरिपुर्यस्तुविंधनेदुरूप्यगृहः तस्यसंयमनायाशुतत्कुलीनंसमुन्नयेत् ६६~~
~~विषंविषेणावध्येतवज्रेणैववज्रेणाभिद्यते गजेन्द्रोदृष्टसारेणगजेन्द्रेणैववाध्यते ६७ मत्स्योमत्स्यंसमादत्तेतज्ज्ञाति~~
~~कर्मणि नतत्कुर्यान्नमेधावी~~ लीनंसमुन्नयेत् ६६ विषविषेणावध्येतवज्रेणैववज्रेणाभिद्यते गजेन्द्रोदृष्टसारेणगजेन्द्रे
णैववाध्यते ६७ मत्स्योमत्स्यंसमादत्तेज्ञातिर्ज्ञातिमसंशयं रावणोच्छित्तयेरामो विभीषणमपूजयत् ६८ यस्मि
न्मंडलसंक्षोभः कृतेभवतिकर्मणि नतत्कुर्यान्नमेधावीप्रकृतीरनुरंजयन् ६९ साम्नादानेनमानेनप्रकृतीरनुरंज
येत् आत्मीयाभेदरंध्राणि व्यापारकीर्योप्सरारयेत् ७० अकोराणीमंडलेसर्वे मित्रैराशिरेवच सर्वःस्वार्थपरोलोकःकुतो

का॰मं॰नी॰ मध्यस्थतः क्वचित् ७१ भोगप्राप्तं विकुर्वाणं मित्रमप्युपपीडयेत् असंतं विहतं हन्यात्स पापो यात्वि यमेतः ७२ अमि
१८ त्रासपधिकुर्वीत मित्राण्युत्तरयावहात् अछिन्नवत्ते मानानि मित्राण्यपि परित्यजेत् ७३ संबंधुर्य्योनुवध्नाति हितेर्य्येवा हि
18 तादरः अनुरक्तं विरक्तं वा तन्मित्रमुपकारि यत् ७४ मित्रं विचार्य्य बहुशो ज्ञातदोषं परित्यजेत् त्यजं तु भूत दोषं हि
धर्म्मार्थावुपहंति यः ७५ स्वयं दोषगणा नेषी भवेत्सर्वत्र सर्वदा स्वयं ज्ञातेष दोषेषु शासने दंडपातने ७६
न त्वविज्ञाय तत्त्वेन दोषश्राव्य कदाचनः अजंयमिव भक्ते न निर्दोषं क्रोधनेजना ७७ मित्राणि मन्त्ररंकुर्य्यान्मा
ध्यमाय: कनीयसां मध्यज्यायः कनीयांसि कर्म्माणि च पृथक्पृथक् ७८ न हि मिथ्याभियुंजीत स्मरणयाच्चापितद्
धं मित्रमेदास्तु येकुर्य्युस्तान्सर्वांस्तु परित्यजेत् ७९ आभ्योगिकं मात्सरिकं माध्यस्थ्यं पाक्षपातिकं सोपन्यासं च ज्ञानी
याद्द्वः संशयितं तथा ८० प्रकाशयेद्यस्य गुह्यं न कुर्यात्सुहृदां स्वयं अन्योन्यमत्सरं चैषामुपमेवाप्रसारयेत् ८१ राम
कार्य्यस्य हि गरीयस्त्वान्नीचानामपि कालवित् सतोपि दोषान्प्रच्छाद्य गुणानप्यसतो वदेत् ८२ प्रायो मित्राणि कुर्वी १८

त सर्वाव स्थानिभ्यतिः वहुमित्रो हि शक्नोति वसे स्थापयितुं रिपून् ८३ नतत्रापि हि तिष्ठन्ति भ्राता न पिता नो पि वा जनः
पुंसामाश्यत्मनीकारे यन्मित्रं यत्नतिष्ठति ८४ अमित्रान्सर्वतो मित्रैर्नेमिं ग्रहकोपाहट बुद्धेः इति मंडल ह ते हि मंडल
ज्ञाः प्रचक्षते ८५ मित्रोदासीनरिपवः एतन् मात्रं हि मंडले सम्यक्ता धनमेतेषामिति मंडलशोधने ८६
इति स्वराजानयत्नेनाव्रजन्समस्थामी मंडलमुद्दिमाचरन् विराजते साधु विशुद्धमंडलः शरच्छशीव प्रतिनं
दय प्रजाः इति कामंदकीये नीतिसारे मंडलयोनिमंडलचारित्रं नामाष्टमः सर्गः ८ वलीयसाभियुक्तस्तु न्यायेऽ
नन्यप्रतिक्रियः आपन्नः संधिमन्विच्छेत्कुर्वाणः कालयापनां १ कपालउपहारश्च सन्तानः संगतस्तथा उप
न्यासः प्रतीकारः संयोगः पुरुषांतरः २ अदृष्टनरश्चादृष्टश्चात्मामिषउपग्रहः परिक्रयस्तथाच्छिन्नस्तथा च परि
भूषणः ३ स्कंधोपनेयः संधिश्च षोडश परिकीर्तिता इति षोडशकं प्राहुः संधिं संधिविचक्षणाः ४ कपालसं
धिर्विज्ञेयः केवलं सम संधितः संप्रदानाद्भवति य उपहारः स उच्यते ५ संतान संधिर्विज्ञेयो दारिकादानपूर्वकः

का·मी·नी

१८ 19 समिःसंयुक्तसंधिस्तु मैत्रीपूर्व उदाहृतः ६ यावदायुःप्रमाणस्तु समानार्थप्रयोजनः संगतःसंधिकु~~शलैःकांचनःपरि~~
रेवप्रहृष्टत्वात्स्ववर्णेवत् ७ संपत्तौ च विपत्तौ च कारणैर्यो न भिद्यते सोऽयं संधिकुशलैः कांचनः परिकीर्तितः ८
भत्ययिकार्यसंसिद्धिं समुद्दिश्य क्रियेत यः स उपन्यासकुशलैरुपन्यास उदाहृतः ९ मयास्योपकृतं पूर्वम
